१४

तिङन्तस्वरः

प्रस्तावना

संस्कृतव्याकरणजगति वैदिकव्याकरणं लौकिकव्याकरणं च विद्यते। वैदिकसाहित्ये वैदिकव्याकरणम् अत्यन्तं प्रमुखतां भजते। तत्र च स्वरप्रकरणम् अतीव रम्यम्। स्वरप्रकरणे प्रकृतिप्रत्यययोः स्वरविषये चर्चा विहिता। पूर्वतनेषु पाठेषु अस्माभिः प्रातिपदिकस्वराः, धातुस्वराः, समासस्वराः, फिट्-स्वराः, प्रत्ययस्वराः आलोचिताः सन्ति। ततः पाठे अस्मिन् तिङन्तस्वरम् अवलम्ब्य विस्तरेण आलोचितम्। तिङ्प्रत्ययः येषाम् अन्ते अस्ति, तानि तिङन्तपदानि। यथा- भवति, गच्छति, बभूव इत्यादीनि पदानि। अस्मिन् प्रकरणे तिङन्तपदानां कः स्वरविशेषः इति आलोच्यः विषयः अस्ति। तिङन्ते स्वरविषयकानि सूत्राणि सम्यक् आलोचितानि। उदहरणसङ्गतिः च प्रदर्शिता। ततः तिङन्ते स्वरनिषेधविधायकानि सूत्राणि अपि आलोचितानि।

उद्देश्यानि

इमं पाठं पठित्वा भवान्-

- तिङन्तस्वरविषये विस्तरेण ज्ञातुं पारयेत्।
- तिङन्तस्वरविधायकानां सूत्राणां व्याख्यानं लिखितुं समर्थः पारयेत्।
- तिङन्तस्वरनिषेधविधायकानि सूत्राणि ज्ञातुं शक्नुयात्।
- तिङन्ते कदा स्वरस्य परिवर्तनं भवति इति विषये ज्ञातुं शक्नुयात्।
- कस्य अव्ययस्य योगे कः स्वरः भवति इति विषये ज्ञातुं शक्नुयात्।

१४.१) तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः॥ (८.१.२७)

सूत्रार्थः - तिङन्तात् पदाद् गोत्रादीनि अनुदात्तानि भवन्ति कुत्सनाभीक्ष्ण्ययोः गम्यमानयोः।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनुदात्तस्वरः अनेन सूत्रेण विधीयते। अस्मिन् सूत्रे त्रीणि पदानि सन्ति। तिङः इति पञ्चम्यन्तं पदम्। गोत्रादीनि इति प्रथमान्तं पदम्। कुत्सनाभीक्ष्ण्ययोः इति सप्तम्यन्तं पदम्। कुत्सना इत्यस्य निन्दा इत्यर्थः। आभीक्ष्ण्यम् इत्यस्य पुनः पुनः इत्यर्थः। पदात् इति सूत्रम् अधिक्रियते। अनुदात्तानि इति प्रथमाबहुवचनान्तं पदम् अनुवर्तते। तिङः इति पदं पदात् इत्यस्य विशेषणम्। अतः तदन्तविधिना तिङन्तात् पदात् इत्यर्थलाभः। अतः सूत्रस्यास्य अर्थः भवति- तिङन्तात्

पदात् पराणि गोत्रादीनि अनुदात्तानि भवन्ति कुत्सनाभीक्ष्ण्ययोः गम्यमानयोः इति। गोत्रादिगणे गोत्र ब्रुव प्रवचन प्रहसन प्रयतन पवन यजन प्रकथन प्रत्यायन प्रचक्षण विचक्षण अवचक्षण स्वाध्याय भूयिष्ठा इत्यादयः शब्दाः पठिताः। अतः सूत्रस्य अस्य अर्थः भवति- तिङन्तात् पदात् पराणि एतानि गोत्रादीनि शब्दस्वरूपाणि अनुदात्तानि भवन्ति कुत्सनाभीक्ष्ण्यार्थयोः गम्यमानयोः इति।

उदाहरणम्- कुत्सनार्थे अस्य सूत्रस्य उदाहरणं हि-पचति गोत्रम्। आभीक्ष्ण्ये उदाहरणं तावत् पचति पचति गोत्रम् इति सूत्रस्य अस्य द्वे उदाहरणे।

सूत्रार्थसमन्वयः- पचति गोत्रम् इत्यत्र तिङन्तात् परं गोत्रशब्दः विद्यते। वाक्यात् निन्दा अपि अवगम्यते। अतः प्रकृतसूत्रेण गोत्रशब्दस्य अनुदात्तत्वं भवति। स्वकुलं ताडयति इत्यर्थः। पचति पचति गोत्रम् इत्यत्र तिङन्तात् परं गोत्रशब्दः विद्यते। अत्र वाक्यात् आभीक्ष्ण्यम् अवगम्यते। अतः प्रकृतसूत्रेण गोत्रशब्दस्य अनुदात्तत्वं भवति। विवाहादौ पुनः पुनः सुखीकरोति इत्यर्थः।

१४.२) तिङ्ङतिङः॥ (८.१.२९)

सूत्रार्थः - अतिङन्तात् पदात् परं तिङन्तं सर्वम् अनुदात्तं भवति।

सूत्रव्याख्या - इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरः विधीयते। द्विपदात्मकं सूत्रमिदम्। तिङ् अतिङः इति सूत्रगतपदच्छेतः। तिङ् इति प्रथमान्तं पदम्। अतिङः इति पञ्चम्यन्तं पदम्। पदात् इति सूत्रमनुवर्तते। सर्वम् इति प्रथमान्तम् अपदादौ इति सप्तम्यन्तं पदं च अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। अतिङः इति पदं पदात् इत्यस्य विशेषणम्। अतः तदन्तविधिना अतिङन्तात् पदात् इत्यर्थः लभ्यते। अनुदात्तम् इति प्रथमान्तम् अनुवर्तते। तेन सूत्रस्यास्य अर्थः भवति- अतिङन्तात् पदात् परस्थितम् अपदादौ यत् तिङन्तम् तत् सर्वम् अनुदात्तं भवति इति।

उदाहरणम्- अ॒ग्निमी॑ळे इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अग्निम् ईळे इति उदाहरणम् अस्ति। अग्निः इति अतिङन्तात् परं तिङन्तम् ईळे इति पदं वर्तते। अतः प्रकृतसूत्रेण अपदादौ स्थितम् ईळे इति पदं सर्वम् अनुदात्तं भवति।

१४.३) अङ्गाऽप्रातिलोम्ये॥ (८.१.३३)

सूत्रार्थः - अङ्गेत्यनेन युक्तं तिङन्तम् अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मकं सूत्रम् इदम्। अङ्ग इति अव्ययपदम्। अप्रातिलोम्ये इति सप्तम्यन्तं पदम्। न प्रातिलोम्यम् अप्रातिलोम्यं तस्मिन् अप्रातिलोम्ये इति नञ्तत्पुरुषसमासः। अप्रातिलोम्ये इत्यस्य अभिमतकारित्वे इत्यर्थः। पदात् इति अधिकृतं पञ्चम्यन्ततया विपरिणम्यते। न इति अव्ययपदम् अनुवर्तते। तिङ्ङतिङः इति सुत्रात् तिङ् इति प्रथमान्तम् अनुवर्तते। तिङ् इति प्रत्ययः अस्ति। अतः प्रत्ययग्रहणपरिभाषया तिङन्तं पदम् इत्यर्थः लभ्यते। अतः अङ्ग इत्यनेन युक्तं तिङन्तम् अनुदात्तं न भवति इत्यर्थः समायाति।

उदाहरणम्- अङ्ग कुरु इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र अङ्ग इत्यनेन युक्तं कुरु इति तिङन्तम् अस्ति। कृधातोः परस्मैपदिनः लोटि मध्यमपुरुषैकवचने कुरु इति रूपम्। अतः अङ्ग इत्यव्ययेन युक्तं कुरु इति तिङन्तम् अनुदात्तं न भवति।

१४.४) हि च॥ (८.१.३४)

सूत्रार्थः - हियुक्तं तिङन्तं नानुदात्तं भवति। अप्रातिलोम्यार्थे हिशब्देन युक्तं तिङन्तम् अनुदात्तं न भवति इत्यर्थः।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मकमिदं सूत्रम्। हि इति अव्ययम्। च इत्यपि अव्ययपदम्। अङ्गप्रातिलोम्ये इति सूत्रात् अप्रातिलोम्ये इति सप्तम्यन्तं पदम् अनुवर्तते। न प्रातिलोम्यम् अप्रातिलोम्यं, तस्मिन् अप्रातिलोम्ये इति नञ्तत्पुरुषसमासः। अप्रातिलोम्ये इत्यस्य अभिमतकारित्वे इत्यर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदमनुवर्तते। अनुदात्तम् इति प्रथमान्तं न इति अव्ययपदं च अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तम् इति लाभः। एवञ्च हियुक्तं तिङन्तम् अनुदात्तं न भवति अप्रातिलोम्ये इति सूत्रार्थः समायाति।

उदाहरणम्- आ हि ष्मा यार्ति इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- याति इति हिशब्दयुक्तं तिङन्तम् अस्ति। अतः तस्मात् परस्य यार्ति इति अनुदात्तं न भवति।

पाठगतप्रश्नाः-१

१. कुत्सनीभीक्ष्ण्ययोः गम्यमानयोः गोत्रादीनि केन सूत्रेण अनुदात्तानि भवन्ति।
२. तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः इति सूत्रस्य कुत्सनार्थे किम् उदाहरणम्।
३. अग्निमीळे इत्यत्र केन सर्वम् अनुदात्तं भवति।
४. तिङ्ङतिङः इति सूत्रस्य अर्थं लिखत।
५. अङ्ग कुरु इति कस्य सूत्रस्य उदाहरणम्।
६. हि च इत्यत्र हि इति किम्।
७. हिशब्दयुक्तं तिङन्तं कथम् अनुदात्तं न भवति।

१४.५) छन्दस्यनेकमपि साकाङ्क्षम्॥ (८.१.३५)

सूत्रार्थः - हीत्यनेन युक्तं साकाक्षमनेकमपि तिङन्तं नानुदात्तं भवति छन्दसि।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। चतुष्पदात्मकमिदं सूत्रम्। छन्दसि अनेकम् अपि साकाक्षम् इति सूत्रगतपदच्छेदः। छन्दसि इति सप्तम्यन्तं पदम्। अनेकम् इति प्रथमान्तं पदम्। अपि इति अव्ययपदम्। साकाक्षमिति प्रथमान्तं पदम्। हि च इति सूत्रात् हि इति अव्ययपदमनुवर्तते। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदमनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न, अनुदात्तम् इति पदद्वयमनुवर्तते। एवञ्च हिशब्दयुक्तं परस्परसाकाङ्क्षम् अनेकमपि तिङन्तम् अनुदात्तं न भवति वेदे इति सूत्रार्थः जायते।

उदाहरणम्- अनृतं हि मत्तो वदति पाप्मा चैनं युनाति इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र वदति इति युनाति इति द्वयं तिङन्तं हिशब्देन युक्तमस्ति। अपि च तिङन्तं परस्परं साकाङ्क्षमस्ति। अतः अत्र तिङन्तम् अनुदात्तं न भवति।

१४.६) उपसर्गव्यपेतं च॥ (८.१.३८)

सूत्रार्थः - यावत्-यथाभ्याम् युक्तम् उपसर्गव्यपेतं तिङ् न अनुदात्तं पूजायाम्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। उपसर्गव्यपेतम् इति प्रथमान्तं पदम्। तस्य च उपसर्गेण व्यवहितम् इत्यर्थः। च इति अव्ययपदम्। यावद्यथाभ्यामिति सूत्रमनुवर्तते। यावत् च यथा च यावद्यथे ताभ्यामिति यावद्यथाभ्याम् इति द्वन्द्वसमासः। पूजायां नान्तरम् इति सूत्रात् पूजायाम् इति सप्तम्यन्तं नान्तरम् इति प्रथमान्तं पदद्वयमनुवर्तते। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदमनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न, अनुदात्तं पदद्वयमनुवर्तते। अतः यावद्यथाभ्यां युक्तम् उपसर्गव्यवहितं तिङन्तं न अनुदात्तं पूजायाम् इति सूत्रार्थः समायाति। अर्थात् तिङन्तशब्दस्य उपसर्गव्यवधाने सत्यपि यावद्यथाभ्यां योगे तिङन्तम् अनुदात्तत्वं न भवति पूजायां गम्यमानायाम्।

उदाहरणम्- यावत् प्रपचति शोभनम् इति अस्य सुत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र यावत्-शब्देन युक्तं प्रपचति इति तिङन्तं प्र-इति उपसर्गव्यवहितम् अस्ति। अत्र पूजायां नानन्तरम् इति सूत्रेण पचति इति तिङन्तस्य अनुदात्तत्वं न निषिध्यते। तस्मात् प्रकृतसूत्रेण तस्य अनुदात्तत्वं निषिध्यते।

१४.७) तुपश्यपश्यताहैः पूजायाम्॥ (८.१.३९)

सूत्रार्थः - तुपश्यपश्यताहैः युक्तं तिङन्तं पूजायाः विषये न अनुदात्तम्।।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। तुपश्यपश्यताहैः इति तृतीयान्तं पदम्। तुश्च पश्यश्च पश्यताः च अहः च इति तुपश्यपश्यताहाः तैः तुपश्यपश्यताहैः इति द्वन्द्वसमासः। पूजायाम् इति सप्तम्यन्तं पदम्। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदमनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न अनुदात्तम् इति पदद्वयमनुवर्तते।

अतः अस्य सूत्रस्य अर्थः भवति- तुपश्यपश्यताहैः शब्दैः युक्तं तिङन्तं पदम् अनुदात्तं न भवति पूजायां गम्यमानायाम् इति।

उदाहरणम्- आदद्दं स्व॒धाम तु॒ पुन॑र्गर्भस्तु मे॑रि॒रे इति सूत्रस्य अस्य उदाहरणम्।

सूत्रार्थसमन्वयः- अत्र मेरिरे इति तिङन्तं पदम् अस्ति। तुशब्देन अहशब्देन वा युक्तम् अस्ति। पूजा अपि अत्र अवगम्यते। अतः प्रकृतसूत्रेण तिङन्तम् अनुदात्तं न भवति।

१४.८) शेषे विभाषा॥ (८.१.४१)

सूत्रार्थः - अहो इत्यनेन युक्तं तिङन्तं विकल्पेन न अनुदात्तम् अपूजायाम्।

सूत्रव्याख्या- इदं विधिसूत्रम्। शेषे इति सप्तम्यन्तं पदम्। विभाषा इति प्रथमान्तं पदम्। अहो च इति सूत्रात् अहो इति ओदन्तम् अव्ययपदम् अनुवर्तते। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न,अनुदात्तम् इति पदम् अनुवर्तते। पूजायाम् इति सप्तम्यन्तं पदम् अनुवर्तते। अतः अस्य सूत्रस्य अर्थः भवति- अहो इत्यनेन अव्ययेन युक्तं तिङन्तं विकल्पेन अनुदात्तं न भवति अपूजायां गम्यमानायाम् इति।

उदाहरणम्- अहो कटं करिष्यति।

उदाहरणसमन्वयः- अत्र करिष्यति इति तिङन्तं पदम् अस्ति। अहो इति अव्ययेन युक्तमपि अस्ति। किञ्च पूजाभिन्नः अर्थः अवगम्यते। अतः प्रकृतसुत्रेण करिष्यति इति तिङन्तम् अनुदात्तं न भवति।

पाठगतप्रश्नाः-२

८. छन्दस्यनेकमपि साकाङ्क्षम् इति सूत्रस्य कः अर्थः।
९. उपसर्गव्यपेतं च इति सूत्रस्य उदाहरणं लिखत।
१०. तुपश्यपश्यताहैः युक्तं तिङन्तं पूजायाः विषये न अनुदात्तं भवति केन सूत्रेण।
११. अहो इत्यव्ययेन युक्तं तिङन्तं केन अनुदात्तं न भवति।
१२. शेषे विभाषा इति सूत्रस्य कः अर्थः।
१३. शेषे विभाषा इति सूत्रस्य एकमुदाहरणं दीयताम्।

१४.९) लोपे विभाषा॥ (८.१.४५)

सूत्रार्थः - किमः लोपे सति क्रियाप्रश्ने अनुपसर्गम् अप्रतिषिद्धं तिङन्तं विकल्पेन अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। द्विपदात्मके अस्मिन् सूत्रे लोपे इति सप्तम्यन्तं पदम्। विभाषा इति प्रथमान्तं पदम्। किं

क्रियाप्रश्ने अनुपसर्गम् अप्रतिषिद्धम् इति सम्पूर्णं सूत्रम् अनुवर्तते। किम् इति प्रथमान्तं पदम्। क्रियाप्रश्ने इति सप्तम्यन्तं पदम्। अनुपसर्गम् इति प्रथमान्तं पदम्। अप्रतिषिद्धम् इति प्रथमान्तं पदम्। निषिद्धं प्रतिषिद्धम् इति अप्रतिषिद्धम्। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न, अनुदात्तम् इति पदद्वयम् अनुवर्तते। तेन सूत्रार्थः भवति- क्रियाप्रश्ने किमः लोपे सति अनुपसर्गम् अप्रतिषिद्धं तिङन्तं विकल्पेन अनुदात्तं न भवति इति।

उदाहरणम्- देवदत्तः पचत्याहोस्वित् पठति।

सूत्रार्थसमन्वयः- अत्र पठति पचति इति तिङन्तं पदम्। क्रियाप्रश्ने अर्थे विद्यमानस्य किम्शब्दस्य लोपः जातः। पठति इति तिङन्तं च अत्र उपसर्गरहितम् अप्रतिषिद्धं अस्ति। अतः प्रकृतसूत्रसामर्थ्यात् पचति इति तिङन्तं विकल्पेन अनुदात्तं न भवति।

१४.१०) किंवृत्तं च चिदुत्तरम्॥ (८.१.४८)

सूत्रार्थः - अविद्यमानपूर्वं चिदुत्तरं यत्किंवृत्तं तेन युक्तं तिङन्तम् अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनुदात्तस्वरस्य निषेधः सूत्रेण अनेन विधीयते। किंवृत्तम् इति प्रथमैकवचनान्तं पदम्। किम्शब्दस्य वृत्तम् इति किंवृत्तम्। च इति अव्ययपदम्। चिदुत्तरम् इति प्रथमैकवचनान्तं पदम्। चिच्छब्दः उत्तरं यस्मात् तत् चिदुत्तरम् इति बहुव्रीहिसमासः। जात्वपूर्वम् इति पूर्वसूत्रात् अपूर्वम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अपूर्वम् इत्यस्य अविद्यमानपूर्वम् इत्यर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न इति अव्ययपदम्, अनुत्तमम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अतः अपूर्वम् चिदुत्तरं किंवृत्तं तिङन्तं न अनुदात्तम् इति सूत्रान्वयः। तेन सूत्रस्य अस्य अर्थः भवति- अविद्यमानपूर्वं चिदुत्तरं यत् किंवृत्तं तेन युक्तं तिङन्तम् अनुदात्तं न भवति इति। अर्थात् यस्मात् किम्शब्दात् पूर्वं किमपि पदं नास्ति। परं च चिच्छब्दः विद्यते। तादृशकिंवृत्तशब्देन युक्तं तिङन्तम् अनुदात्तं न भवति इति।

उदाहरणम्- कश्चिद् भुङ्क्ते इति सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र यः किम्शब्दः वर्तते। तस्मात् पूर्वं किमपि पदं नास्ति। परं च चिच्छब्दः विद्यते। तद्युक्तं तिङन्तं च भुङ्क्ते इति। अतः प्रकृतसूत्रेण तत् तिङन्तम् अनुदात्तं न भवति।

१४.११) आहो उताहो चानन्तरम्॥ (८.१.४९)

सूत्रार्थः - आहो उताहो इत्येताभ्यां युक्तं तिङन्तम् अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। चतुष्पदात्मकमिदं सूत्रम्। आहो इति अव्ययपदम्। उदाहो इति अव्ययपदम्। च इत्यपि अव्ययपदम्। अनन्तरम् इति प्रथमैकवचनान्तं पदम्। न अन्तरम् अनन्तरम् इति नञ्तत्पुरुषसमासः। जात्वपूर्वम् इति पूर्वसूत्रात् अपूर्वम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अपूर्वम् इत्यस्य अविद्यमानपूर्वम् इत्यर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न इति अव्ययपदम्, अनुत्तमम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। तेन अस्य सूत्रस्य अर्थः भवति- आहो उताहो इत्याभ्याम् अविद्यमानपूर्वाभ्यां युक्तम् अनन्तरं तिङन्तम् अनुदात्तं न भवति इति। अर्थात् पूर्वं किमपि पदं नास्ति ययोः, एतादृशाभ्याम् आहो उताहो इत्यव्ययाभ्यां युक्तं तिङन्तम् अनुदात्तं न भवति इति।

उदाहरणम्- आहो उताहो वा भुङ्क्ते इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे आहो उताहो इति अव्ययद्वयं विद्यते। तयोः पूर्वं च किमपि पदं नास्ति। किञ्च भुङ्क्ते इति तिङन्तम् आहो उताहो इत्याभ्याम् अव्ययाभ्यां युक्तम् अस्ति। अतः प्रकृतसूत्रेण भुङ्क्ते इति तिङन्तम् अनुदात्तं न भवति।

१४.१२) शेषे विभाषा॥ (८.१.५०)

सूत्रार्थः - आभ्यां युक्तं व्यवहितं तिङन्तं विकल्पेन अनुदात्तं भवति।

सुत्रव्याख्या- इदं विधिसूत्रम्। विकल्पेन अनुदात्तस्वरः अनेन सुत्रेण विधीयते। द्विपदात्मकमिदं सूत्रम्। शेषे इति सप्तम्यन्तं पदम्। शेषे इत्यस्य च अनन्तरभिन्ने इत्यर्थः। विभाषा इति प्रथमान्तं पदम्। आहो उताहो चानन्तरम् इति सूत्रात् आहो उताहो इति अव्ययपदद्वयम् अनुवर्तते।जात्वपूर्वम् इति सूत्रात् अपूर्वम् इति प्रथमान्तं सुबन्तं पदम् अनुवर्तते। अपूर्वम् इत्यस्य अविद्यमानपूर्वेण इत्यर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं सुबन्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तम् इति पदलाभः भवति। न अनुदात्तम् इति पदद्वयम् अनुवर्तते। तेन आहो उताहो इत्येताभ्याम् अपूर्वाभ्यां युक्तं तिङन्तं शेषे विकल्पेन अनुदात्तं भवति इति सूत्रार्थः समायाति। अर्थात् आहो उताहो इत्याभ्यां युक्तमपि व्यवहितं तिङन्तं विकल्पेन अनुदात्तं भवति इति फलितार्थः।

उदाहरणम्- आहो देवः पचति इति अस्य सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे पचति इति तिङन्तं पदम् अस्ति। आहो इत्यव्ययेन युक्तम् अस्ति। किञ्च तिङन्तपदं व्यवहितम् अस्ति। अतः प्रकृतसूत्रेण विकल्पेन अनुदात्तं भवति।

१४.१३) गत्यर्थलोटा लृण्ण चेत्कारकं सर्वान्यत्॥ (८.१.५१)

सूत्रार्थः - गत्यर्थानां लोटा युक्तं तिङन्तम् अनुदात्तं न भवति, यत्रैव कारके लोट् तत्रैव लृट् अपि चेत्।

सूत्रव्याख्या- इदं विधिसूत्रम्। सूत्रेण अनेन अनुदात्तस्वरस्य निषेधः विधीयते। षट्पदात्मकमिदं सूत्रम्। गत्यर्थलोटा लृट् न चेत् कारकं सर्वान्यत् इति सूत्रगतपदच्छेदः। गत्यर्थलोटा इति तृतीयैकवचनान्तं पदम्। लृट् इति प्रथमैकवचनान्तं पदम्। न इति अव्ययपदम्। चेत् इति अव्ययपदम्। कारकम् इति प्रथमैकवचनान्तं पदम्। सर्वान्यत् इति प्रथमैकवचनान्तं पदम्। गतिः अर्थः यस्य सः गत्यर्थः इति बहुव्रीहिसमासः। गत्यर्थः अर्थः यस्य इति गत्यर्थः इति शाकपार्थिवादिवत्समासः। गत्यर्थः चासौ लोट् च इति गत्यर्थलोट्, तेन गत्यर्थलोटा इति कर्मधारयसमासः। गत्यर्थलोटा युक्तम् इत्यर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं सुबन्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तम् इति पदलाभः भवति। न इति अव्ययम्, अनुदात्तम् इति प्रथमैकवचनान्तं पदद्वयम् अनुवर्तते। तेन सूत्रस्य अस्य अर्थः भवति- गत्यर्थलोटा युक्तं लृडन्तं यत् तिङन्तं तत् अनुदात्तं न भवति यत्रैव कारके लोट् तत्रैव लृडपि चेत् इति। अर्थात् यस्मिन् स्थले कर्तरि कर्मणि वा लोट् भवति तस्मिन्नेव स्थले यदि लृट् भवेत् तर्हि गत्यर्थलोटा युक्तं तिङन्तम् अनुदात्तं न भवति इति।

उदाहरणम्- आगच्छ देव ग्रामं द्रक्ष्यसि एनम् इति अस्य सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र कर्तरि लोट्लकारः अस्ति। तस्मिन्नेव अर्थे लृट्लकारः अस्ति। आगच्छ इति गत्यर्थलोटा युक्तं तिङन्तम्। अतः प्रकृतसूत्रेण आगच्छ इति लोडन्तं तिङन्तम् अनुदात्तं न भवति।

१४.१४) लोट् च॥ (८.१.५१)

सूत्रार्थः - गत्यर्थलोटा युक्तं लोडन्तं नानुदात्तम्।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मकमिदं सूत्रम्। लोट् इति प्रथमान्तं पदम्। लोट् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया लोडन्तमिति लाभः। च इति अव्ययपदम्। गत्यर्थलोटा लृण्ण चेत्कारकं सर्वान्यत् इति सूत्रात् गत्यर्थलोटा, चेत् कारकम्, सर्वान्यत् इति पदानि अनुवर्तन्ते। गत्यर्थलोटा इति तृतीयान्तं पदम्। गतिः अर्थः यस्य सः गत्यर्थः इति बहुव्रीहिसमासः, गत्यर्थः अर्थः यस्य इति गत्यर्थः इति शाकपार्थिवादिवत्समासः। गत्यर्थः चासौ लोट् इति गत्यर्थलोट् तेन गत्यर्थलोटा इति कर्मधारयसमासः। लृट् इति प्रथमान्तं पदम्। न इति अव्ययपदम्। चेत् इति अव्ययपदम्। कारकमिति प्रथमान्तं पदम्। सर्वान्यत् इति अव्ययपदम्। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। अनुदात्तमिति प्रथमान्तं पदम् अनुवर्तते। एवञ्च गत्यर्थलोटा युक्तं यत् लोडन्तं तिङन्तं तत् अनुदात्तं न भवति इति सूत्रार्थः समायाति।

उदाहरणम्- आगच्छ देव ग्रामं पश्य।

सूत्रार्थसमन्वयः- अत्र पश्य इति तिङन्तं लोडन्तमस्ति। आगच्छ इति गत्यर्थलोटा युक्तं तिङन्तम् अपि अस्ति। अतः प्रकृतसूत्रेण पश्य इति तिङन्तम् अनुदात्तं न भवति।

१४.१५) हन्त च॥ (८.१.५४)

सूत्रार्थः - हन्तेत्यनेन युक्तमनुदात्तं लोडन्तं विकल्पेन अनुदात्तं भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनुदात्तस्वरः अनेन सूत्रेण विधीयते। हन्त इति अव्ययपदम्। च इति अपि अव्ययं पदम्। विभाषितम् सोपसर्गमनुत्तमम् इति सम्पूर्णं सूत्रमनुवर्तते। विभाषितम् इति प्रथमान्तं पदम्। सोपसर्गम् इत्यपि प्रथमान्तं पदम्। अनुत्तमम् इति प्रथमान्तं पदम्। न उत्तमम् इति अनुत्तमम् इति नञ्तत्पुरुषसमासः। तस्य च उत्तमपुरुषभिन्नम् इत्यर्थः। लोट् च इति सूत्रात् लोट् इति प्रथमान्तं पदम् अनुवर्तते। लोड् इति प्रत्ययसंज्ञकः अस्ति। अतः प्रत्ययग्रहणपरिभाषया लोडन्तमिति लाभः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। अनुदात्तम् इति पदम् अनुवर्तते। तेन अस्य सूत्रस्य अर्थः भवति- हन्त इत्यनेन युक्तं लोडन्तं अनुत्तमं तिङन्तं विकल्पेन अनुदात्तं भवति इति। अर्थात् हन्त इति शब्देन युक्तम् उपसर्गपूर्वकं लोड्विभक्त्यन्तम् अनुदात्तं विकल्पेन भवति किन्तु उत्तमपुरुषे न भवति इति।

उदाहरणम्- हन्त प्रविश इति अस्य सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र हन्त इत्यनेन युक्तम् अस्ति प्रविश इति तिङन्तं पदम्। तच्च उपसर्गपूर्वकमपि अस्ति। किञ्च उत्तमपुरुषः नास्ति। अतः प्रकृतसूत्रसामर्थ्यात् अत्र अनुदात्तं विकल्पेन भवति।

१४.१६) यद्धितुपरं छन्दसि॥ (८.१.५६)

सूत्रार्थः - यद्धितुपरं तिङन्तं छन्दसि विषये अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मके अस्मिन् सूत्रे यद्धितुपरम् इति प्रथमैकवचनान्तं पदम्। यच्च हि च तुश्च इति यद्धितु इति समाहारद्वन्द्वसमासः, तस्मात् परं यद्धितुपरम् इति पञ्चमीतत्पुरुषसमासः। यच्छाब्दात् परं हिशब्दात् परं तुशब्दात् परम् इत्यर्थः। छन्दसि इति सप्तम्येकवचनान्तं पदम्। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न इति अव्ययपदम्, अनुदात्तम् इति प्रथमैकवचनान्तं पदद्वयम् अनुवर्तते। अतः सूत्रस्य अस्य अर्थः भवति- यच्छब्दात् परं हिशब्दात् परं तुशब्दात् परं तिङन्तं छन्दसि विषये अनुदात्तं न भवति इति।

उदाहरणम्- उदसृंजो यदंङ्गिरः। उशन्ति हि। आख्यास्यामि तु ते इत्यादि अत्र उदाहरणम्।

सूत्रार्थसमन्वयः- उशन्ति इति अत्र तिङन्तं हिशब्दयुक्तम् अस्ति। अतः तत् अनुदात्तं न भवति।

पाठगतप्रश्नाः-३

१४. लोपे विभाषा इति सूत्रस्य अर्थं लिखत।

१५. पचति आहोस्वित् पठति इति कस्य सूत्रस्य उदाहरणम्।

१६. शेषे विभाषा इति सूत्रस्य अर्थः कः।

१७. गत्यर्थलोटा युक्तं लोडन्तं कथं नानुदात्तम्।

१८. आगच्छ देव ग्रामं पश्य इति कस्य सूत्रस्य उदाहरणम्।

१९. हन्त च इति सूत्रस्य एकम् उदाहरणं दीयताम्।

२०. हन्त इत्यनेन युक्तमनुदात्तं लोडन्तं विकल्पेन अनुदात्तं केन सूत्रेण भवति।

१४.१७) चादिषु च॥ (८.१.५८)

सूत्रार्थः - चवाहाहैवेषु तिङन्तम् अनुदात्तं न भवति।

सूत्रावतरणम्- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मकम् इदं सूत्रम्। चादिषु इति सप्तम्यन्तं पदम्। चकारः आदिः येषां ते चादयः तेषु चादिषु इति बहुव्रीहिसमासः। च इति अव्ययपदम्। चनचिदिवगोत्रादितद्धिताम्रेडितेष्वगतेः इति सूत्रात् अगतेः इति पञ्चम्यन्तं पदम् अनुवर्तते। न गतिः अगतिः तस्मात् अगतेः इति द्वन्द्वसमासः। अगतेः इत्यस्य गतिसंज्ञाभिन्नात् इति अर्थः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। अतः चादिषु परेषु अगतेः उत्तरं तिङन्तम् अनुदात्तं न भवति इति सूत्रार्थः समायाति।

सूत्रव्याख्या- देवः पचति च खादति च इति सूत्रस्य अस्य एकमुदाहरणम्।

उदाहरणम्- अत्र पचति खादति इति द्वयं तिङन्तम् अस्ति। पचति इत्यस्मात् पूर्वम् अगतिसंज्ञकः चकारः अस्ति। खादति इत्यस्मात् परम् अगतिसंज्ञकः चकारः अस्ति। अतः पचति खादति इत्यनयोः तिङन्तयोः अनुदात्तं न भवति इति।

१४.१८) चादिलोपे विभाषा॥ (८.१.६३)

सूत्रार्थः - चवाहाहैवानां लोपे प्रथमा तिङ्विभक्तिर्नानुदात्ता।

सूत्रव्याख्या- इदं विधिसूत्रम्। चादिलोपे इति सप्तम्यन्तं पदम्। चकारः आदिः येषां ते चादयः चादीनां लोपः, चादिलोपः तस्मिन् चादिलोपे इति बहुव्रीहिगर्भतत्पुरुषसमासः। विभाषा इति प्रथमान्तं पदम्। चवायोगे प्रथमा इति सूत्रात् प्रथमा इति प्रथमान्तं पदम् अनुवर्तते। प्रथमा इति विभक्तिः इत्यनेन अन्वेति। अतः प्रथमा तिङ्विभक्तिः इत्यर्थलाभः। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न इति अव्ययपदम्, अनुदात्ततम् इति प्रथमान्तं पदद्वयम् अनुवर्तते। अतः सूत्रस्यास्य अर्थः भवति- चवाहाहैवानां लोपे प्रथमतिङ्विभक्त्यन्तं विकल्पेन अनुदात्तं न भवति इति।

उदाहरणम्- इन्द्र॒ वाजे॑षु नोऽव इति सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- इन्द्र॒ वाजे॑षु नोऽव इत्यस्मिन् वाक्ये अव इति तिङन्तं पदम्। अत्र च चादीनां लोपः जातः। अतः अत्र विकल्पेन अनुदात्तं न भवति।

१४.१९) यद्वृत्तान्नित्यम्॥ (८.१.६६)

सूत्रार्थः - यत्र पदे यच्छब्दः ततः परं तिङन्तं नित्यम् अनुदात्तं न भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरस्य निषेधः विधीयते। द्विपदात्मके अस्मिन् सूत्रे यद्वृत्तात् इति पञ्चम्येकवचनान्तं पदम्। यद्वृत्तात् इत्यस्य यस्मिन् पदे यच्छब्दः अस्ति। तस्मात् परम् इत्यर्थः। नित्यम् इति प्रथमैकवचनान्तं पदम्। तिङ्ङतिङः इति सूत्रात् तिङ् इति प्रथमान्तं पदम् अनुवर्तते। तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्तमिति लाभः। न इति अव्ययपदम्, अनुदात्तम् इति प्रथमान्तं पदम् अनुवर्तते। एवञ्च यद्वृत्तात् उत्तरं तिङन्तं नित्यं न अनुदात्तम् इति सूत्रार्थः। अर्थात् यस्मिन् पदे यच्छब्दः विद्यते ततः परं यत् तिङन्तं पदं तत् नित्यम् अनुदात्तं न भवति इति सूत्रार्थः समायाति।

उदाहरणम्- यो भुङ्क्ते। यदद्ध्रयङ् वायुर्वाति इति सूत्रस्य अस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- यो भुङ्क्ते। यदद्ध्रयङ् वायुर्वाति इत्यत्र भुङ्क्ते इति वाति इति च द्वयं तिङन्तं पदम् अस्ति। उभयमपि यच्छब्दात् परम् अस्ति। तस्मात् प्रकृतसूत्रेण अत्र तिङन्तम् अनुदात्तं न भवति।

१४.२०) पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः॥ (८.१.६७)

सूत्रार्थः - पूजनेभ्यः काष्ठादिभ्यः पूजितवचनम् अनुदात्तं भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरः विधीयते। अस्मिन् सूत्रे चत्वारि पदानि सन्ति। पूजनात् पूजितम् अनुदात्तं काष्ठादिभ्यः इति सूत्रगतपदच्छेदः। पूजनात् इति पञ्चम्येकवचनान्तं पदम्। पूजितम् इति प्रथमैकवचनान्तं पदम्। अनुदात्तम् इति प्रथमैकवचनान्तं पदम्। काष्ठादिभ्यः पञ्चमीबहुवचनान्तं पदम्। काष्ठाशब्दः आदिः येषां ते काष्ठादयः तेभ्यः काष्ठादिभ्यः इति बहुव्रीहिसमासः। काष्ठादिगणे काष्ठा दारुण अमातापुत्र वेश अनाज्ञात अनुज्ञात अपुत्र अयुत अद्भुत भृश घोर सुख कल्याण अनुक्त इत्यादयः शब्दाः पठिताः। सगतिरपि तिङ् इति परसूत्रे तिङ्ग्रहणात् इदं सूत्रं सुब्विषयकम्। अतः सुप् इति प्रथमान्तं पदं लभ्यते। सुप् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया सुबन्तमिति लाभः। अनुदात्तम् इति प्रथमान्तं पदम् अनुवर्तते। पूजनात् इति पदं काष्ठादिभ्यः इत्यत्र बहुवचनान्ततया अन्वेति। अतः सूत्रस्य अर्थः भवति- पूजनेभ्यः काष्ठादिभ्यः पूजितं सुबन्तम् अनुदात्तं भवति इति। अर्थात् पूजनार्थेभ्यः काष्ठादिभ्यः परं पूजितं सुबन्तम् अनुदात्तं भवति इति।

उदाहरणम्- काष्ठाध्यापकः इति सूत्रस्य अस्य एकम् उदाहरणम्।

सूत्रार्थसमन्वयः- अस्मिन् उदाहरणे काष्ठादिगणे पठितः काष्ठाशब्दः पूजितार्थे विद्यते। अपि च सुबन्तं पदम् अस्ति। अतः प्रकृतसुत्रेण तत् सुबन्तम् अनुदात्तं भवति।

१४.२१) गतिर्गतौ॥ (८.१.७०)

सूत्रार्थः - गतौ परतः गतिः अनुदात्तः भवति।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनुदात्तस्वरः अनेन सूत्रेण विधीयते। द्विपदात्मकम् इदं सूत्रम्। गतिः गतौ इति सूत्रगतपदच्छेदः। गतिः इति प्रथमैकवचनान्तं पदम्। गतौ इति सप्तम्येकवचनान्तं पदम्। अनुदात्तम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। गतिः इत्यनेन गतिश्च इति सूत्रेण विधीयमानाः प्रादयः गतिसंज्ञकाः उपसर्गाः उच्यन्ते। अतः गतिसंज्ञके परे गतिसंज्ञकः अनुदात्तः भवति इति सूत्रार्थः जायते।

उदाहरणम्- अभ्युद्धरति इति अस्य सूत्रस्य एकम् उदारणम्।

सूत्रार्थसमन्वयः- अभ्युद्धरति इत्यत्र हरति इति तिङन्तम् अभि इति गतिसंज्ञकम् उदिति अपि गतिसंज्ञकं पदम्। उदिति गतिसंज्ञकं पदम् अभि इति गतिसंज्ञकात् पदात् परम् अस्ति। अतः उदिति गतिसंज्ञकम् अनुदात्तं भवति प्रकृतसूत्रेण।

१४.२२) तिङि चोदात्तवति॥ (८.१.७१)

सूत्रार्थः - उदात्तवति तिङन्ते परे गतिर्निहन्यते।

सूत्रव्याख्या- इदं विधिसूत्रम्। अनेन सूत्रेण अनुदात्तस्वरः विधीयते। त्रिपदात्मके अस्मिन् सूत्रे तिङि इति सप्तम्येकवचनान्तं पदम्। च इति अव्ययपदम्। उदात्तवति इत्यपि सप्तम्येकवचनान्तं पदम्। गतिर्गतौ इति सूत्रात् गतिः इति प्रथमान्तं पदम् अनुवर्तते। तिङि इत्यत्र तिङ् इति प्रत्ययः। अतः प्रत्ययग्रहणपरिभाषया तिङन्ते इति लाभः। अनुदात्तम् इति प्रथमैकवचनान्तं पदम् अनुवर्तते। अतः सूत्रस्य अस्य अर्थः भवति- उदात्तवति तिङन्ते परे गतिसंज्ञकः अनुदात्तः भवति इति।

उदाहरणम्- यत्प्रपचति इति अस्य सूत्रस्य एकमुदाहरणम्।

सूत्रार्थसमन्वयः- अत्र प्र इति गतिसंज्ञकः अस्ति। पचति इति तिङन्तम् उदात्तवत् पदं प्र इत्यस्मात् परम् अस्ति। अतः प्रकृतसूत्रेण प्र इति गतिसंज्ञकः अनुदात्तः भवति।

पाठगतप्रश्नाः -४

२१. चादिषु च इति सूत्रस्य अर्थं लिखत।
२२. चादिलोपे विभाषा इति सूत्रस्य एकमुदाहरणं दीयताम्।
२३. पूजनात्...इति सूत्रं पूरयत।
२४. के गतिसंज्ञकाः उच्यन्ते।
२५. तिङि चोदात्तवति इति सूत्रेण कीदृशे तिङन्ते परे गतिः अनुदात्तः भवति।

पाठसारः

अस्मिन् पाठे तिङन्तस्वरविषये वस्तुतः विस्तरेण आलोचितम् अस्ति। तिङन्तस्वरविधायकानि चितानि सूत्राणि अत्र आलोचितानि। धातोः तिङ्प्रत्ययेन तिङन्तं पदं भवति। तिङन्तानां पदानां सामान्येन अनुदात्तस्वरः एव विधीयते । अत्र च कैश्चित् सूत्रैः तिङन्तस्वरः विधीयते। कैश्चित् सूत्रैः तिङन्ते अनुदात्तस्वरः निषिध्यते। अत्र साकल्येन अष्टादश सूत्राणि व्याख्यातानि। कदाचित् अव्ययेन युक्ते तिङन्ते स्वरः विधीयते। कदाचित् स्वतः एव स्वरः विधीयते। अव्यययुक्ते तिङन्ते उदाहरणं यथा अङ्ग कुरु इत्यादि। स्वतः यथा अ॒ग्निमी॑ळे इत्यादि। तिङन्तमाश्रित्य अपि कदाचित् स्वरः विधीयते यथा पचति गोत्रम् इत्यादि। तिङन्तात् पराणि गोत्रादीनि अनुदात्तानि भवन्ति। अत्र व्याख्यानकाले गोत्रादयः शब्दाः उल्लिखिताः। अतिङन्तात् परं तिङन्तम् अनुदात्तं भवति। यथा अ॒ग्निमी॑ळे इत्यादि। तिङन्ते च परे गतिसंज्ञकः अनुदात्तः भवति। उदाहरणं यथा अभ्युद्धरति इति। प्रादयः क्रियायोगे गतिसंज्ञकाः भवन्ति। एवमेव पाठस्य अस्य विषयः तिङन्तस्वरः इति।

पाठान्तप्रश्नाः

१. तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः इदं सूत्रं व्याख्यात।
२. अङ्गाऽप्रातिलोम्ये अस्य सूत्रस्य व्याख्यानं कुरु।
३. लोपे विभाषा इति सूत्रं व्याख्यात।
४. आहो उताहो चानन्तरम् इति सूत्रं व्याख्यात।
५. गत्यर्थलोटा... अस्य सूत्रस्य अर्थं लिखित्वा उदहरणसङ्गतिं दर्शय।
६. चादिलोपे विभाषा इति अस्य सूत्रस्य व्यख्यानं कुरुत।
७. तिङि चोदात्तवति इति सूत्रं व्याख्यात।

पाठगतप्रश्नानाम् उत्तराणि

उत्तराणि-१

१. तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः इति सूत्रेण।
२. पचति गोत्रम् इति।
३. तिङ्ङतिङः इति सूत्रेण।
४. अतिङन्तात् पदात् परं तिङन्तं सर्वम् अनुदात्तं भवति इति तिङ्ङतिङः इति सूत्रस्य अर्थः।
५. अङ्गाऽप्रातिलोम्ये इति सूत्रस्य उदाहरणम्।

६. हि इति अव्ययपदम्।

७. हि च इति सूत्रनिषेधात्।

उत्तराणि-२

८. हीत्यनेन युक्तं साकाक्षमनेकमपि तिङन्तं नानुदात्तं भवति छन्दसि।

९. यावत् प्रपचति शोभनम् इति अस्य सुत्रस्य एकमुदाहरणम्।

१०. तुपश्यपश्यताहैः पूजायाम् इति सूत्रेण।

११. शेषे विभाषा इति सूत्रेण।

१२. अहो इत्यनेन युक्तं तिङन्तं वानुदात्तं पूजायाम् इति।

१३. अहो कटं करिष्यति इति शेषे विभाषा इति सूत्रस्य एकमुदाहरणम्।

उत्तराणि-३

१४. किमः लोपे सति क्रियाप्रश्ने अनुपसर्गम् अप्रतिषिद्धं तिङन्तं विकल्पेन अनुदात्तं न भवति इति सूत्रार्थः।

१५. लोपे विभाषा इति सूत्रस्य उदाहरणम्।

१६. आहो उदाहो इत्याभ्यां युक्तं व्यवहितं तिङन्तं विकल्पेन अनुदात्तं भवति इति।

१७. लोट् च इति सूत्रनिषेधात्।

१८. लोट् च इति सूत्रस्य उदाहरणम्।

१९. हन्त प्रविश इति अस्य सूत्रस्य एकमुदाहरणम्।

२०. हन्त च इति सूत्रेण भवति।

उत्तराणि-४

२१. चवाहाहैवेषु तिङन्तम् अनुदात्तं न भवति।

२२. इन्द्र वाजेषु नोऽव इति सूत्रस्य एकमुदाहरणम्।

२३. पूजनात्पूजितमनुदात्तं काष्ठादिभ्यः इति।

२४. प्रादयः क्रियायोगे गतिसंज्ञकाः भवन्ति।

२५. उदात्तवति तिङन्ते परे गतिः।

।।इति चतुर्दशः पाठः।।